CS (Main) Exam:2015

विरोज्य DETACHABLE

0000005

# SANSKRIT
## (COMPULSORY)

| Time Allowed : Three Hours | Maximum Marks : 300 |
|---|---|

### QUESTION PAPER SPECIFIC INSTRUCTIONS

**Please read each of the following instructions carefully before attempting questions.**

All questions are to be attempted.

The number of marks carried by a question/part is indicated against it.

Answer must be written in Sanskrit (Devanagari script) unless otherwise directed in the question.

Word limit in questions, wherever specified, should be adhered to and if answered in much longer or shorter than the prescribed length, marks may be deducted.

Any page or portion of the page left blank in the Question-cum-Answer Booklet must be clearly struck off.

1. अधोलिखितेषु कमप्येकं विषयमधिकृत्य षट्शतशब्देषु (600 शब्देषु) निबन्धो लेख्यः। 100
   (a) युवके वर्धमाना चिन्ता
   (b) असाफल्यं साफल्यस्य सोपानप्रस्तरः
   (c) किम् अध्ययनरुचिः ह्रासोन्मुखी
   (d) समाजे व्याप्ताभ्यः कुरीतिभ्यः संघर्षः

2. अधोलिखितगद्यांशं सावधानतया पठित्वा तदुपरिष्टाद् दत्तानां प्रश्नानामुत्तरं स्पष्टतया स्वगिरा साधु दीयताम्। 12×5=60

महाविद्यालयेभ्यः विश्वविद्यालयेभ्यश्च उत्तीर्णेषु जनेषु 80-प्रतिशत-जनाः वृत्तिहीनाः सन्ति। युवकवर्गसम्पर्कात् असम्मतोऽहं एतत्संख्यया। एतत्सम्पर्कात् अहं केवलमिदं कथयामि, यत् केवलं 90-प्रतिशत-युवकाः निष्ठाया अभावात् उत्तरदायित्वशून्यत्वाच्च वृत्तिरहिताः वर्तन्ते। क्वचिद् युवकाः दुर्व्यहारात्मकेन विश्वासेन सह त्रुटीन् कुर्वन्ति ते कार्याणि अकुर्वन् प्रचुरधनार्जनं कर्तुमिच्छन्ति। न ते निरर्थकाः। तेषु बहवः सुष्ठु आंग्लभाषां वदन्ति आत्मविश्वासिनश्चापि सन्ति। ते जानन्ति नवीनतमा प्रवृत्तिः 'रिंग टोन', चलचित्राणि, हास-परिहासान् च, परं यदा कश्चिद् ईषदुन्नतिं प्राप्नोति, तदा ते मां रिक्तनेत्रैः पश्यन्ति। ते प्रचुरधनमर्जितुम् इच्छन्ति, तदर्थं धन्यवादयोग्यानि सन्ति, नियमतः प्रकाशितानि 'मीडिया टाइप'-'वेतन-सर्वेक्षणानि'। परं तेषु नास्ति तादृशी दक्षता या तेषां प्रचुरधनाजनि सहायिका भवेत्। तेषाम् उपाधयः शङ्कास्पदभूताः। तान् स्नातकविषयान् काञ्चित् प्रश्नान् पृच्छन्तु, तेषु बहवः युवजनाः सपदि अस्फुटं वदन्ति। अतिरिक्ताध्ययने न पठति कश्चित् तात्त्विकं पठनीयम्; परमत्र अन्येऽपि प्रश्नाः – यथा सदाचारविषयकाः व्यवहारविषयकाश्च। कुत्र भवतां नैपुण्यम्, कथं भवन्तः रिक्तकालं यापयन्ति। तदनन्तरं

एतेषाम् आश्वस्तानां युवकानां युवतीनां च समूहः संशयपरया दृष्ट्या इदं पृच्छन्तः प्रतीयन्ते, यत् मया एते प्रश्नाः कथं समाधेयाः । अनुचितमिदं कथनं यत् तेषामिदं जीवनम् । ते स्वात्मविषयमेव वदन्तु इत्यावश्यकम् । यतः ते सदा पिष्टपेषणानि उत्तराणि दातुमिच्छन्ति, अतः तेषामिदमेव कथनीयं यत् तान् एतेभ्यः मुक्तिं ददातु । यदि ते कथयन्ति यदहं पर्याप्तं एतदभ्यासं करिष्यामि तर्हि अहम् अवश्यमेव एतत् साधयिष्यामि । रात्रौ एव इत्थं युवाजनाः लोभिपाठकाः, 'गिटार-वादकाः' 'स्टार-बल्लेवाजाः', अभिनेतारश्च जायन्ते । इदं मे आश्चर्यं, यत् कश्चित् बालिशः जनः एतासु 'हाफ बेक्ड'-कथासु विश्वसिति ।

प्रगतिमार्गे विद्यमाने भारते एतादृशोऽचिन्तकः जनसमूहः सञ्जातः यस्य उद्देश्यस्य पूर्णता न किञ्चित् कर्तुमपि श्रेष्ठजीवनयापने निहितमस्ति । इदं प्रतीयते यद् दृष्टिशून्याः प्रतिबद्धता-नैतिकता-रहिताः वयं भ्रमणशीलान् प्रस्तरान् 'रोलिंग स्टोन्सान्' सृजामः । किञ्चिदुपयोगिकार्यकरणविकल्पं प्रति युवकजनानामेतदुत्तरमस्ति यत् ते स्वजीवनरक्षां स्वयमेव करिष्यन्ति । अत्र कश्चिद् आदर्शवादः कल्पनीयोऽस्ति । यदा त्वं युवा असि तदा तव विचारः व्यर्थम् एव, परं त्वं किञ्चिद् उद्देश्यस्य पूर्णतायै प्रस्तुतः । अधुना युवकाः उद्देश्यपूरणाय निरुत्साहाः सन्ति । अभ्यस्तानाम् उत्तराणां श्रवणाद् अहमेतदवगच्छामि यत् 'न्यू जेनेरेशन' धनाय एव । यो जनः किञ्चित् सार्थकं वदति सः न एतत्कालीनः ।

(a) युवकानां वृत्तिविहीनतायाः कानि कारणानि ? 12

(b) वर्तमानकालीनः युवकः लेखकात् किम् इच्छति ? 12

(c) लेखकमते 'न्यू जेनेरेशन' इत्यस्य एकमात्रमुद्देश्यं किम् ? 12

(d) वर्तमानकालिकानां युवजनानां कः नवमन्त्रः ? 12

(e) 'आदर्शवाद'-विषये वर्तमानकालिकानां युवजनानां कीदृशी प्रवृत्तिः । 12

**3.** अधस्तनगद्यांशस्य संक्षेपः मूलभागस्य तृतीयांश एव लेख्यः । शीर्षको न देयः । 60

रक्षाक्षेत्रे विदेशनिर्भरतायाः न्यूनीकरणम् आत्मनिर्भरतायाः प्राप्तिश्च सामरिकेण आर्थिकेन उभयकारणैरपि विकल्पापेक्षया आवश्यकता वर्तते । अतीतकाले सर्वकारेण अस्माकं सशस्त्रबलानाम् आवश्यकतानां पूर्त्यर्थं आयुधनिर्माणोपक्रमस्य सार्वजनिकक्षेत्रोपक्रमाणां रूपेण च उत्पादनक्षमताः विकसिताः । परं विभिन्नानां रक्षोपक्रमाणाम् उत्पादनक्षमतानां विकासार्थाय भारते स्वक्षेत्रीयायाः भूमिकायाः सुसंवर्धनस्य आवश्यकता वर्तते । विभिन्नवस्तूनां निर्माणस्य संवर्धनाय 'मेक इन इण्डिया'-सदृशो महत्त्वपूर्णः उपक्रमः प्रारब्धः । अन्यवस्तूनामपेक्षया रक्षोपकरणानां देशे एव उत्पादनस्य महती आवश्यकता वर्तते, यतः अनेन न केवलं वैदेशिकमुद्रायाः संञ्चयः भविष्यति अपितु राष्ट्रियसुरक्षादिचिन्तानाम् अपवारणमपि भविष्यति ।

रक्षाक्षेत्रे सर्वकार एव एकमात्रम् उपभोक्ता । अतः 'मेक इन इण्डिया' योजना अस्माकं गृहनीत्या सञ्चालितो भविष्यति । सर्वकारस्य स्वदेशीयरक्षोद्योगवर्धनस्य नीतिः रक्षाक्रयनीत्यां स्पष्टं परिलक्ष्यते । तत्र 'बाई इण्डियन'-'बाइ एण्ड मेक इण्डियन'-श्रेणीनां 'ग्लोबल'-स्थानात् प्रथमं भवति । आगामिनि समये आयातं दुर्लभात् दुर्लभतरं भविष्यति, तस्य आवश्यकव्यवस्थायाः निर्माणाय विकासाय च सर्वप्रथमः अवसरः भारतीय-उद्योगस्य एव प्राप्तो भविष्यति । वरं भारतीय-कम्पनीषु साम्प्रतं प्रौद्योगिकी-विषयेषु पर्याप्तक्षमतायाः अभावः संभवति, ताः विदेशीकम्पनीभिः सह संयुक्त-उद्यमाय प्रौद्योगिकी-हस्तान्तरणव्यवस्थार्थं गठबन्धनाय च प्रोत्साहिताः क्रियन्ते ।

अद्यावधि रक्षाक्षेत्रे स्वदेशीयानाम् उद्योगानां प्रवेशविषये 'लाइसेंस'-वैदेशिकनिवेश-प्रतिबन्ध-प्रभृतयः अनेकबाधाः आसन् । रक्षा-विनिर्माणक्षेत्रे निवेशस्य प्रक्रियायाः सरलीकरणाय अधुना नीतयः उदारीकृताः

सन्ति । सर्वाधिक-महत्त्वपूर्णे रक्षाक्षेत्रे प्रत्यक्षवैदेशिकनिवेशस्य प्रवर्धनाय 'एफ.डी.आई'-नीतिः उदारीकृता । 'लाइसेंस-नीतिः' अपि उदारीकृता वर्तते । तत्परिणामतया घटकाः यन्त्रभागाः तदंशाः अनिर्मिता सामग्री, परीक्षणोपकरणानि उत्पादनयन्त्रादीनि 'लाइसेंस'स्य सीम्नि न सन्ति । याः 'कम्पन्यः' एतादृशानि वस्तूनि उत्पादयितुमिच्छन्ति, तेषां कृते 'लाइसेंस'स्य आवश्यकता नास्ति ।

रक्षाक्षेत्रे स्वदेशीयानां विदेशीयानाम् उभयप्रकारकाणां निवेशकानां कृते महान् अवसरः उपलब्धः । एकतः सर्वकारः निर्यात-'लाइसेंसिंग' एफ.डी.आई-सहितस्य निवेश-क्रयाय नीतौ आवश्यकं परिवर्तनं करोति, अन्यतः तेन उद्योगाः आवश्यकनिवेशस्य विषये प्रौद्योगिकी-विषये च उन्नयनाय प्रतिस्पर्धा- स्वीकरणाय समक्षम् आयान्तु, इत्यपेक्ष्यते । रक्षा ईदृशं क्षेत्रं, यत् नवाचारेण सञ्चालितं भवति, यत्र च प्रभूत-निवेशस्य प्रौद्योगिक्याः च आवश्यकता वर्तते । अतः उद्योगः अस्थायी लाभापेक्षया दीर्घावध्यर्थं भवति इति चिन्तनपरायाः मानसिकतायाः संवर्धनं करणीयम् । अनुसन्धानविकासं प्रति, नवीनतमविनिर्माणक्षमतां प्रति अस्माभिः अधिकं ध्यानं देयम् । सर्वकारः स्वदेशी-उद्योगाय एकस्याः ईदृश्याः पारिस्थितिक्याः प्रणाल्याः विकासाय प्रतिबद्धोऽस्ति, यदा सः सार्वजनिकस्य स्वस्य चोभयोः क्षेत्रैः समानेन स्तरेण व्यावसायिकीम् उन्नतिं कुर्यात् । (Total words – 266)

**4.** अधःस्थ-गद्यभागस्य आंग्लानुवादः कर्तव्यः । 20

साम्प्रतं देशस्य बहुभूभागः 'रेगिस्तानम्' अस्ति । अत्र सर्वत्र बालुकाः प्रस्तराश्च सन्ति । बालुका एतादृशी तप्पायते यत् त्वं तदुपरि चलनेऽसमर्थः भवसि । 'रेगिस्तान' परितः जलस्रोतांसि वर्तन्ते, तानि पृथिव्या अधः प्रोन्नतानि तानि एतादृशानि निम्नस्थितानि, यत् सूर्योऽपि तानि शोषयितुमशक्तः । तानि कतिपयानि एव, परं यत्रकुत्रापि एकमपि तेषां वर्तते तत्र उन्नताः वृक्षाः रोहन्ति, अतिसुन्दराणि च ते दृश्यन्ते, स्रोतांसि परितः छायाप्रदानि कुञ्जानि सृजन्तः । एतादृशानि नगराणि 'नखलिस्तानम्' इति कथ्यन्ते ।

ये भारतवासिनः नगरेषु न निवसन्ति ते आवर्षं 'रेगिस्ताने' एवं वसन्ति ते यासु 'पल्लीषु' वसन्ति, तानि सुविधापूर्वकं स्थापयितव्यानि विस्थापयितव्यानि च, तत्परिणामतः ते एकस्मात् 'नखलिस्तानात्' अपरात् 'नखलिस्तानं' स्वकीयानां मेषानाम् अजानाम् उष्ट्राणाम् अश्वानां च कृते ग्रासान् जलानि च आनयितुं गच्छेयुः । रेगिस्ताननिवासिनः तानि सुपक्वानि अञ्जीराणि खर्जूराणि च खादन्ति, यानि एतेषु वृक्षेषु फलन्ति । ते वर्षपर्यन्तं तानि शोषयन्ति तदनन्तरं च तेषां खाद्यपदार्थरूपेण उपयोगं कुर्वन्ति ।

एतेषां 'अरब-वासिनां पार्श्वे विश्वस्य सर्वोत्तमाः अश्वाः सन्ति । अरववासी स्वारोहयोग्यया अश्वसम्पदा स्वं गौरवान्वितम् अनुभवति, तस्यां स्वस्त्री इव पुत्र इव च स्निह्यति । परम् उष्ट्रः सुन्दरात् अश्वात् तु अधिकोपयोगी अस्ति स तु विशालतरः बलवत्तरोऽपि अस्ति । एकः उष्ट्रः अश्वद्वयात् बलवत्तरो भवति । अरबवासिनः स्वोष्ट्राणां प्रयोगं बहुवस्तुवहनाय 'रेगिस्ताने' बहु-'मील'-असंख्य-'मील'-परिमितेषु स्थानेषु भ्रमणाय च कुर्वन्ति । वस्तुतः 'उष्ट्रः रेगिस्तानस्य जहाजः' अस्ति । प्रायः इत्थमेव आकार्यते सः ।

**5.** अधस्तनगद्यांशस्य संस्कृतभाषानुवादः करणीयः । 20

Language and communication are something that children learn by talking to one another. But schools consider this an act of indiscipline. Instead, we have a special grammar class to learn language ! One educationist remarked, 'It is nice that children spend just a few hours at school. If they spend all 24 hours in schools, they will turn out to be dumb !' In most schools, teachers talk, children listen. The same is true for other skills also. Children learn a great deal without being taught, by tinkering and pottering on their own.

Changes in the school system, if they are to be of lasting significance, must spring from the actions of teachers in their classrooms, teachers who are able to help children collectively. New programmes, new materials and even basic changes in organisational structure will not necessarily bring about healthy growth. A dynamic and vital atmosphere can develop when teachers are given the freedom and support to innovate. One must depend ultimately upon the initiative and respectfulness of such teachers and this cannot be promoted by prescribing continuously and in detail what is to be done.

In education we can cry too much about money. Sure, we could use more, but some of the best classrooms and schools I have seen or heard of, spend far less per pupil than the average in our schools today. We often don't spend well what money we have. We waste large sums on fancy buildings, unproductive administrative staff, on diagnostic and remedial specialists, on expensive equipment that is either not needed, or underused or badly misused, on tons of identical and dull textbooks, readers and workbooks, and now on latest devices like computers. For much less than what we do spend, we could make our classrooms into far better learning environments than most of them are today.

**6.(a)** अधोलिखितानां स्वरचितवाक्येषु प्रयोगः कार्यः । $2\times5=10$

**6.(a)(i)** अपि

**6.(a)(ii)** सम्प्रति

**6.(a)(iii)** सह

**6.(a)(iv)** कुतः

**6.(a)(v)** अभितः

**6.(b)** पदसाधनं क्रियताम् । $1\times10=10$

**6.(b)(i)** अस्मद् + चतुर्थी एकवचनम्

**6.(b)(ii)** रवि + द्वितीया बहुवचनम्

**6.(b)(iii)** शिशु + सप्तमी एकवचनम्

**6.(b)(iv)** विद्वस् + प्रथमा द्विवचनम्

**6.(b)(v)** आत्मन् + तृतीया एकवचनम्

**6.(b)(vi)** दृश् + लट्, उत्तमपुरुषे बहुवचनम्

**6.(b)(vii)** ज्ञा + लट्, प्रथमपुरुषे द्विवचनम्

**6.(b)(viii)** गम् + लृट्, उत्तमपुरुषे एकवचनम्

**6.(b)(ix)** पठ् + लोट्, उत्तमपुरूषे द्विवचनम्

**6.(b)(x)** स्मृ + लृट्, प्रथमपुरुषे बहुवचनम्

**6.(c)** समासो विधेयः, समासनाम च लेखनीयम् । $2\times5=10$

**6.(c)(i)** अनु विष्णु

**6.(c)(ii)** अष्टौ च विंशतिश्च

**6.(c)(iii)** कण्ठे कालो यस्य

**6.(c)(iv)** हरेः सादृश्यम्

**6.(c)(v)** हरिणा त्रातः

**6.(d)** अधोलिखितानि वाक्यानि शुद्धीकरणीयानि । $2\times5=10$

**6.(d)(i)** अहं ग्रामे गच्छामि ।

**6.(d)(ii)** श्यामः कटम् उपविशति ।

**6.(d)(iii)** नगस्य निकषा वनमस्ति ।

**6.(d)(iv)** पुत्रः पितुः सह धावति ।

**6.(d)(v)** अहं पठ्यते ।

---